# 2024

## SANSKRIT — HONOURS

**Paper : SEC-1**

**(Skill of Reading and Writing)**

**Full Marks : 75**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

### Unit – I

1. (a) यथेच्छ**मेकः** प्रश्नः देवनागरलिप्या समाधेयः। 5

(i) क-वर्गीयाः वर्णाः लेखनीयाः।

(ii) यथेच्छं पञ्च स्वरवर्णाः लेख्याः।

(iii) पञ्चानां वर्गाणाम् अन्त्यवर्णाः लेखनीयाः।

(b) अधोलिखितेषु यथाकामं न्यूनतया अक्षरत्रयात्मकं **पदद्वयं** यथानिर्दिष्टं देवनागरलिप्या लेख्यम्। 2½×2

(i) ञ् + ज् – इत्यनयोः युक्तरूपात्मकं पदम्

(ii) क् + ष् – इत्यनयोः युक्तरूपात्मकं पदम्

(iii) ह् + म् – इत्यनयोः युक्तरूपात्मकं पदम्

(iv) ऋ + ऋ – इत्यनयोः युक्तरूपात्मकं पदम्।

2. यथेच्छं **षट्**वाक्यानि संस्कृतभाषया अनूद्य देवनागरलिप्या लिखत। 2×6

(a) বারাণসী ভারতবর্ষের প্রাচীনতম নগরী।
(Vārāṇasī is the most ancient city of India.)

(b) সূর্য পূর্বদিকে উদিত হয়।
(The Sun rises in the east.)

(c) দশরথের চারজন পুত্র ছিল।
(Daśaratha had four sons.)

(d) মিথ্যা কথা বলো না।
(Do not Lie.)

(e) তাপস উচ্চশিক্ষার জন্য বিদেশে যাবে।
(Tapas will go abroad for higher studies.)

(f) অর্জুন এক সাহসী যোদ্ধা ছিলেন।
(Arjuna was a brave warrior.)

(g) আমার মা শিবের পূজা করতে মন্দিরে গিয়েছিলেন।
(My mother went to the temple to worship Śiva.)

(h) রাবণকে হত্যা করে রাম অযোধ্যায় ফিরে গেলেন।
(Killing Rāvaṇa Rāma returned to Ayodhyā.)

3. अधोदत्तेषु वाक्येषु यथामति ***षण्णां*** वङ्गभाषया आङ्गलभाषया वा अनुवादः करणीयः। 2×6

(a) आत्मानं सततं रक्षेत्।

(b) नृपः दरिद्राय नवीनं वस्त्रं यच्छति।

(c) ग्रामस्य उत्तरस्यां दिशि क्रीडाक्षेत्रम् अस्ति।

(d) शत्रवोऽपि हितायैव विवदन्तः परस्परम्।

(e) वृन्तमेव पुष्पाणां फलानां च धारकम्।

(f) केवलं पुण्यमेव पापं खण्डयितुं शक्नोति।

(g) न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।

(h) श्रद्धया देयम्, अश्रद्धया अदेयम्।

4. अधोविद्यमानेषु यथेच्छम् अनुच्छेद***मेकं*** पठित्वा अन्ते प्रदत्तानां प्रश्नानाम् उत्तरं लिखत। 15

(a) कस्मिंश्चिद् वनोद्देशे चण्डवर्मा नाम राक्षसः प्रतिवसति स्म। एकदा तेन भ्रमता अटव्यां कश्चन ब्राह्मणः समासादितः। ततस्तस्य स्कन्धमारुह्य प्रोवाच – भो अग्रे सरो गम्यताम्। ब्राह्मणोऽपि भयत्रस्तमपस्तमादाय प्रस्थितः। अथ तस्य कमलकोमलौ पादौ दृष्ट्वा ब्राह्मणो राक्षसमपृच्छत् – भोः, किमेवंविधौ ते पादौ अतिकोमलौ? राक्षस आह – भोः, व्रतमस्ति। नाहमार्द्रपादो भूमिं स्पृशामि। ततस्तच्छ्रुत्वा आत्मनो मोक्षोपायं चिन्तयन् ब्राह्मणः तत् सरः प्राप्तः। ततो राक्षसेनाभिहितम् – भोः, यावदहं स्नानं कृत्वा देवतार्चनविधिं विधाय आगच्छामि तावत् त्वया अतः स्थानात् नान्यत्र गन्तव्यम्।

(i) राक्षसः कुत्र प्रतिवसति स्म? किं च तस्य नाम?

(ii) तेन कदा कः समासादितः?

(iii) राक्षसेन ब्राह्मणः किमादिष्टः?

(iv) ब्राह्मणेन राक्षसः किं पृष्टः?

(v) राक्षसः ब्राह्मणवचनस्य किमुत्तरं दत्तवान्?

(vi) सरः-स्नानात् पूर्वं राक्षसः ब्राह्मणमुद्दिश्य किमुक्तवान्? 2+2+3+2+3+3

(b) तत्रैकेन धूर्तेन गच्छन् स ब्राह्मणोऽभिहितः – भो ब्राह्मण, किमिति कुक्कुरः स्कन्धेनोह्यते? विप्रेणोक्तम् – नायं श्वा, किन्तु यज्ञच्छागः। अथानन्तरस्थितेनान्येन धूर्तेन तथैवोक्तम्। तदाकर्ण्य ब्राह्मणच्छागं भूमौ निधाय मुहूर्निरीक्ष्य पुनः स्कन्धे कृत्वा सन्दिग्धमतिश्चलितः। तदनन्तरं पुनस्तृतीयधूर्तवचनं श्रुत्वा स विप्रो भ्रमं निश्चित्य छागं त्यक्त्वा च गृहं ययौ। छागश्च नीत्वा धूर्तैः खादितः।

(i) प्रथमः धूर्तः ब्राह्मणं किम् अवदत्?

(ii) तदा विप्रः किं प्रत्युवाच?

(iii) द्वितीयः धूर्तः तं किम् अवदत्?

(iv) द्वितीयधूर्तवचनं श्रुत्वा ब्राह्मणस्य मनसि कीदृशी प्रतिक्रिया सञ्जाता?

(v) ब्राह्मणः कथं छागं त्यक्तवान्?

(vi) ततः परित्यक्तस्य छागस्य का परिणतिः जाता? 2+2+2+3+3+3

5. अधोलिखितेषु वाक्येषु ***चतुर्णां*** यथानिर्देशं वाच्यपरिवर्तनं विधेयम्। 2½×4

(a) वत्सः गोदुग्धं पिबति। (कर्मवाच्येन लेखनीयम्)

(b) शिशुः खादति। (भाववाच्येन लेखनीयम्)

(c) गुरुणा शिष्यः धर्ममुच्यते। (कर्तृवाच्येन लेखनीयम्)

(d) अहं गच्छामि। (भाववाच्येन लेखनीयम्)

(e) शिष्यैः वेदाः पठ्यन्ते। (कर्तृवाच्येन लेखनीयम्)

(f) शिशुः चन्द्रं पश्यति। (कर्मवाच्येन लेखनीयम्)

6. निम्नलिखितेषु यथामति ***चतुर्णां*** वर्णसंशोधनं कार्यम्। 2×4

(a) रामायनम्

(b) सुसुप्तिः

(c) नदीसु

(d) शरेन

(e) अग्नीसोमौ

(f) प्रमानम्

7. अधोलिखितेषु शब्दयुगलेषु यथेच्छं **द्वयोः** अर्थपार्थक्यं निरूप्यताम्। 4×2

(a) उच्चरति – उच्चरते

(b) शपति – शपते

(c) भुनक्ति – भुङ्क्ते

(d) विनयति – विनयते

---